वर्णवाची योऽनुदात्तान्तस्तोपधस्तदन्तादनुपसर्जनात्प्रातिपदिकाद्वा ङीप् स्यात्तकारस्य नकारादेशश्च । एनी । एता । रोहिणी । रोहिता । वर्णानां तणतिनितान्तानामिति फिट्सूत्रेणाद्युदात्तः । त्र्येण्या च त्रयाणां त्र्येति गृह्यसूत्रम् । त्रीण्येतानि वस्त्वा इति बहुव्रीहिः । अनुदात्तात्किम् । श्वेता । घृतादीनां चेत्यन्तोदात्तः । अत इत्येव । क्षितिः स्त्री ।* पिशङ्गादुपसङ्ख्यानम् *॥ पिशङ्गी । पिशङ्गा ॥ किंतु* असितपलितयोर्न * असिता । पलिता ॥* छन्दसि क्वचिन्नेके * ॥ असिक्नी । पलिक्नी ॥ अवदातशब्दस्तु न वर्णवाची । विशुद्धवाची तेन अवदाता इत्येव ॥

496. The affix ङीप् is optionally employed after a Nominal-stem expressive of colour, ending in a gravely accented vowel, and having the letter त् as its penultimate letter : and the letter न् is substituted in the room of त् ॥

Thus of एत 'variegated'; the feminine is एता or एनी 'variegated.' रोहिणी or रोहिता, so श्वेता or श्वेनी 'black,' हरिता or हरिणी 'green'. All these words have udâtta accent, on the first vowel, by the Phit sûtra II. 10 (वर्णानां तणतिनितान्तानाम् 'of words expressive of colour and ending in तण, or ति or नि or त, the udâtta accent falls on the first vowel") as they are formed by तन् &c. (Uṇ III. 36). Thus त्र्येण्या च त्रयाणां (Gṛihya Sûtra). The word tryenyâ is a Bahuvrîhi, meaning "she who has three variegated".

Why do we say "ending in a gravely accented vowel?" Observe श्वेता 'white.' Here though the word expresses 'color,' yet it has acute (instead of grave) accent on the final (by the rule of Phit sutra I. 21 घृतादीनां च "the words ghṛita &c., have udâtta on the final").

The words for the application of this rule must end in the letter त in the masculine. Otherwise this rule will not apply. As क्षितिः स्त्री 'a black woman.' Here क्षिति : is a word expressive of color, it has a penultimate त,

Digitized by Google

has anudâtta accent on the final (VI. 1. 197) as it is formed by the affix क्विन्; but as it does not end in र, its feminine is not formed with ñîp.

Vârt:—The affix ñîp comes also after the word पिशङ्ग; as, पिशङ्गी or पिशङ्गा 'of tawny color.'

Vârt:—There is prohibition in the case of the words असित and पलित; as असिता 'black' and पलिता 'grey.'

Vârt:—According to some, the substitute ऋन् replaces the final of these two words असित and पलित in the Vedic literature. As असिक्नी (Rig Veda IX. 73. 29); पलिक्नी R. Veda V. 2. 4. The word अवदातः does not denote 'color,' but "purity" hence its feminine is अवदाता ॥ Amarkosha is wrong when it says "अवदातः means white clear,"

४६७ । अन्यतो ङीष् । ४ । १ । ४० ॥

तोपधभिन्नाद्वर्णवाचिनोऽनुदात्तान्तात्प्रातिपदिकात् स्त्रियां ङीष् स्यात् । कल्माषी । सारङ्गी । लघावन्ते द्वयोश्च बह्वचो गुरुरिति नड्बोदात्तावेतौ । अनुदात्तान्तात्किम् । कृष्णा । कपिला ॥

497. The affix ङीष् is employed in the feminine after every other word expressive of color and ending with an anudâtta accent, and which has no त as penultimate.

The word वा of IV. 1. 38 does not govern this sûtra. The word अन्यतः means in other cases than those governed by the last aphorism *i. e.* after words which have *not* त as penultimate. The difference between ñîp and ñish affixes consists in accent, the former being gravely accented (III. 1. 4) and the latter acute. Thus सारङ्गी, कल्माषी ॥ Both these words have acute on the middle by Phiṭ Sûtra II. 19 (A word whose final syllable is light, or a polysyllabic word whose two syllables are light, gets the acute on the heavy syllable wherever that may be).

Why do we say "ending with a syllable which is gravely accented"? Because when the word does not end with a gravely accented vowel, this rule does not apply, as, कृष्णा, कपिला ॥

४६८ । षिद्गौरादिभ्यश्च । ४ । १ । ४१ ॥

षिदन्तो गौरादिभ्यश्च ङीष् स्यात् । नर्तकी । गौरी । मनुङ्ही । मनुङ्वी ॥ पिप्पल्यादयश्च ° ॥ आकृतिगणोऽयम् ॥

498. The affix ङीष् is employed in forming the feminine after words ending with affixes which have an indicatory ष् and after the words गौर and the rest.

Thus by Sûtra III. 1. 145 S. 2907 the affix ष्वुन् is added to a

Digitized by Google

root, to form noun of agency, denoting an artist. The feminine of the words so formed, will take ङीष्. As, नर्तकी 'an actress.' So also the words गौर &c; as गौरी, अनडुही अनड्वाही ॥

In the Gaurâdi class is to be included the Pippalâdi words also (see Ganapâtha at the end.) This is an Âkritigana, no complete list being given any where.

४६९ । सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः । ६ । ४ । १४९ ॥

अङ्गस्योपधाया यस्य लोपः स्यात्स चेद्यः सूर्याद्यवयवः ॥ *मत्स्यस्य ङ्याम् * ॥ *सूर्यागस्त्ययोश्छे च ङ्यां च * ॥ * तिष्यपुष्ययोर्नक्षत्राणि लोप इति वाच्यम् * ॥ मत्सी । मातरि पितरीति पित्र्यादेव सिद्धे गौरादिषु मातामहीशब्दपाठादनित्यः पितां ङीष् । दंष्ट्रा ॥

499. Of the bha stems सूर्य, तिष्य, अगस्त्य and मत्स्य (and their derivatives when they are Bha) the penultimate य् is also elided before the long ई and a Taddhita affix.

Thus सूर्यैणेकादिक्=सौरी (सूर्य+अण् under IV. 3. 112 S. 1492=सौर्य, then ई of ङीप्=सौरी), as सोरी बलाका ॥

So also तिष्य—तैषमहः, तैषी रात्रिः ॥ So also अगस्त्यापत्यं स्त्री=आगस्ती (IV. 1. 114 S. 1117). आगस्तीयः; So also मत्स्य—मत्सी with ङीष् as it belongs to the Gaurâdi class (IV. 1. 41 S. 498).

Vârt:—The य of मत्स्य is elided before the feminine ई only: therefore not here मत्स्यस्येदं मांसं=मात्स्यम् ॥

Vârt:—Of सूर्य and अगस्त्य before the affixes छ and ई (of the feminine): as सौरीयः, सौरी, आगस्तीयः, आगस्ती ॥ But not here सौर्यं चरुं निर्वपेत्, आगस्त्य formed with the Patronymic अण् (IV. 1. 114)

Vârt:—Of तिष्य and पुष्य when referring to asterisms, as, तिष्येण नक्षत्रेण युक्तः कालः=तैषः, पौषः (IV. 2. 3 S. 1204).

By the *vartika* यावादि पित्च given under IV. 2. 36, S. 1242 the affix आमह in मातामह is treated as having an indicatory प ॥ The word मातामह will take ङीष् because it is पित्; its inclusion in the list of Gaurâdi indicates that the rule of ङीष् application, because a word is पित्, is not universal (अनित्यः पित् लक्षणो ङीष्) ॥ Therefore we have forms like दंष्ट्रा &c.

५०० । जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबरादवृत्स्यमाशपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु । ४ । १ । ४२ ॥

एभ्य एकादशभ्यः प्रातिपदिकेभ्यः क्रमाद्वृत्त्यादिष्वर्थेषु ङीष्स्यात्। जानपदी वृत्तिश्चेत्। अन्या तु जानपदी। उस्तादित्वादभ्यन्तत्वेन टिड्ढेति ङीप्यापद्युदात्तः। कुण्डी अभर्तृके चेत्। कुण्डान्या। कुण्डि दाहे। गुरोश्च हल इति अप्रत्ययः। वस्तु अभूते जारजः कुण्ड इति मनुष्यजातिवचनस्ततो जातिलक्षणो ङीष् नवत्वेव। अभर्तृके हि स्त्रीविषयत्वाभावादप्राप्तो ङीष् विधीयते नतु नियम्यते। गोणी आवपनं चेत्। गोण्यान्या।

Digitized by Google

स्थली अकृत्रिमा चेत् । स्थलाऽन्या । भाजी भ्राणा चेत् । भाजाऽन्या । नागी स्थूला चेत् । नागाऽन्या । गजवाची नागशब्दः स्थौल्यगुणयोगादन्यत्र प्रयुक्त उदाहरणम् । सर्पवाची तु दैर्घ्यगुणयोगादन्यत्र प्रयुक्तः प्रस्तुदाहरणम् । काली वर्णभेत् । कालाऽन्या । नीली अनाच्छादनं चेत् । नीलाऽन्या । नील्या रक्ता शाटीत्यर्थः । नील्या अन्यवस्त्रस्य इत्यत् । अनाच्छादनादौ न सर्वत्र किंतु ॥ * नीलाशोधधौ * ॥ नीली ॥ * प्राणिनि च * ॥ नीली गोः ॥ संज्ञायां वा * ॥ नीली । नीला । कुशी अयोविकारभेत् । कुशाऽन्या । कामुकी मैथुनेच्छा चेत् । कामुकाऽन्या । कबरी केशानां सांनिवेशभेत् । कबराऽन्या विशेषेत्यर्थः ॥

500. The affix ङीष् is employed after the eleven words jânapada &c, in the sense of profession &c. respectively; i. e. after the words 1. जानपद 2. कुण्ड, 3. गोण, 4. स्थल, 5. भाज, 6. नाग, 7. काल, 8. नील, 9. कुश, 10 कामुक, and 11 कबर; the affix ङीष् is employed when the sense is that of 1. 'profession or living' 2. 'a bowl', 3. 'a sack or vessel for keeping grain', 4. 'a natural spot of ground'; 5. 'a cooked food or rice-gruel', 6. 'stout', 7. 'black-coloured', 8. 'blue-coloured other than cloth', 9. 'a plough-share', 10. 'a libidinous female' 11. 'a fellet or braid of hair'; respectively.

Thus जानपदी 'a profession', otherwise जानपदी, the difference being in accent only. For this word is formed by adding the affix अञ् to janapada, by sûtra IV. 1. 86, as it belongs to Utsâdi class of words: in forming the feminine the affix ङीष् will be added in this latter case by IV. 1. 15 S. 470 thus throwing the acute accent on the first syllable.

(2) So also कुण्डी 'bowl-shaped vessel', otherwise कुण्डा 'an adulteress'. To the root 'कुडि दाहे' the affix अ is added by III. 3. 103. S. 3280. The nasal being added, because the Verb is read with an indicatory ङ् in the Dhâtupâtha. The कुण्डः when meaning the son of a woman by a man other than her husband, while the husband is alive, is a word denoting caste or class and will therefore take ङीष् in the feminine by IV. 1. 63, S. 518. and therefore the feminine will be कुण्डी and कुण्डा ॥

In denoting a vessel in the feminine, there would have been no ङीष् in the feminine by any rule, so this rule ordains ङीष् and it does not make a niyama rule with regard to कुण्ड ॥ For, had it been a niyama rule, we could not have obtained the form कुण्डी meaning 'a female bastard'.

(3) गोणी 'a sack' यत्र धान्यादि प्रक्षिप्य नीयते otherwise गोणा, a particular name. (4) स्थली 'a place not prepared by artificial improvement'; otherwise स्थला as स्थलवोदकं परिगृह्णन्ति ॥ (5) भाजी 'cooked', otherwise भाजा, (6) नागी 'a stout elephantess', otherwise नागा "a long she-serpent". When नाग denotes

Digitized by Google

'an elephant' and the quality of stoutness is applied to it, then only its feminine will be नागी under the present sûtra. But when नाग denotes a serpent, and the length is only indicated, there the counter-example is नागा ॥

(7) काली 'a-black female', otherwise काला 'a name of a female where the name itself has no particular meaning.

(8) When cloth is not denoted, we have नीली ॥ But when cloth is meant, the feminine will be नीला which means 'a blue colored cloth.' This word is formed by adding the affix अच् denoting 'colored' by the *Vârtika* under sûtra IV. 2. 2. S. 1203 and thus the base is नीलच् to which आप् is added in forming the feminine.

The word अनाच्छादने in the sûtra is rather too wide, it should be confined to the two senses indicated below i. e. when it applies to a plant called indigo or to animals'.

Vârtika:—ङीष् is added in forming the feminine of नील when a medicinal plant is meant, as नीली 'an indigo plant'.

Vârtika:—So also when an animal is meant as नीलीगोः The Nilgâi.

Vârtika:—Optionally so, when it is a proper name, as नीली or नीला ॥

(9) कुशी 'a plough share', otherwise कुशा 'a rope or a kind of grass' (10) कामुकी 'a libidinous or lustful woman' otherwise कामुका 'a woman desirous of wealth'. (11) कबरी 'a fillet or braid of hair', otherwise कबरा 'mixed, variegated'.

५०१ । शोणात्प्राचाम् । ४ । १ । ४३ ॥

शोणी । शोणा ॥

501. The affix ङीष् is optionally employed in the feminine according to the opinion of the Eastern Grammarians, after the word शोण ॥

Thus शोणी or शोणा वडवा 'a red or bay mare'

५०२ । वोतो गुणवचनात् । ४ । १ । ४४ ॥

उदन्तादुगुणवाचिनो वा ङीष् स्यात् ॥ मृद्वी । मृदुः । उतः किम् ॥ शुचिः । शुनोति क्विप् । आखुः ॥ * खरुसंयोगोपधात्र * ॥ खरुः पार्थिवरा कन्या । पाण्डुः ॥

502. The affix ङीष् is optionally employed in the feminine after a word expressive of a quality and ending in short उ ॥

Thus मृदुः or मृद्वी 'soft'. Why do we say 'ending in a short उ'? Observe शुचिरियं ब्राह्मणी 'this Brahmana lady is pure'. Why do we say

Digitized by Google

"expressive of a quality?" Observe मार्जारः 'a mouse' (both masculine and femenine).

Vârt:—Prohibition must be stated after the word स्वयं, and after words ending in short इ, which have a conjunct consonant as penultimate. As स्वयंवरिता ब्राह्मणी 'a Brahmaṇî who chooses her own husband'. Similarly पाण्डु is common gender, as ण्ड् is a conjunct consonant. As पाण्डुरिता ब्राह्मणी ॥

५०३। बह्वादिभ्यश्च। ४। १। ४५॥

एभ्यो ङीष् स्यात्। बह्वी बहुः॥ * कृदिकारादक्तिनः * ॥ रात्रिः। रात्री॥ सर्वतोऽक्तिन्नर्थाद्वि धेयात्॥ शकटिः। शकटी। अक्तिन्नर्थाल्लिङ्। अञ्जनिः। क्तिन्तस्त्वाद्यर्थे विध्यर्थे पङ्क्तिशब्दो गणे पठ्यते। हिमकाषिहतिषु च पङ्क्तावः। पङ्क्तिः पङ्क्ती॥

503. And the affix ङीष् is optionally employed in the feminine after the words बहु and the rest.

As बहुः or बह्वी॥

Vârtika:—So also after the vowel इ of a kṛit affix, not क्तिन् (III. 3. 94), as रात्रिः or रात्री॥

Vârtika:—Some: say that the feminine affix *nîsh* may come after any word ending in इ, if it has not the force of the affix क्तिन्॥ As शकटिः or शकटी॥

Why do we say 'not क्तिन्'? Observe अञ्जनिः॥

The word पङ्क्ति is read in the Gaṇapâṭha, to make it a *vidhi*, although it is formed with the affix क्तिन्॥ This word is formed in accordance with the rule laid down in VI. 3. 54. S. 992. Thus:—पाद + हति + क्तिन् = पङ्क्ति॥ Its Feminine is either पङ्क्तिः or पङ्क्ती॥

५०४। पुंयोगादाख्यायाम्। ४। १। ४८

या पुमान्सा पुंयोगात् स्त्रियां वर्तमाने तस्माद् ङीष् स्यात्। गोपस्य स्त्री गोपी॥ * पालकान्ताच्च * ॥ गोपालिका। अश्वपालिका॥ * सूर्याद्देवतायां चाप् वाच्यः * ॥ सूर्यस्य स्त्री देवता सूर्या। देवतायां किम्। सूरी कुन्ती। मानुषीयम्॥

504. The feminine affix ङीष् comes after a word when it expresses the name of a wife in relation to her husband.

Thus the wife of Gopa is गोपी.

Vârt:—Prohibition must be stated in the case of words ending in पालक॥ Thus गोपालिका 'the wife of a cow-herd'; also अश्वपालिका॥

Vârt:—The affix चाप् comes after सूर्य in denoting the wife of Sûrya, when she is a celestial being. As सूर्या 'the celestial wife of the god Sûrya.' Why do we say 'a celestial being'? Observe सूरी denoting the human wife of Sûrya, such as, Kunti.

Digitized by Google

५०५ इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् । ४।१।५९॥

एषामानुगागमः स्यात् ङीष् च । इन्द्रादीनां षण्णां मातुलाचार्ययोश्च पुंयोग एवेष्यते । तत्र ङीषि सिद्धे आनुगागमनमात्रं विधीयते । इतरेषां चतुर्णामुभयम् ॥ इन्द्राणी ॥ * हिमारण्ययोर्महत्त्वे *॥ महद्धिम हिमानी । महदरण्यम् अरण्यानी ॥ * यवाद्दोषे *. ॥ दुष्टो यवो. यवानी । * यवनाल्लिपिवचनानी ॥ * मातुलोपाध्याययोरानुग्वा * ॥ मातुलानी । मातुली । उपाध्यायानी ॥ उपाध्यायी ॥ * या तु स्वयमेवाध्यापिका तत्र वा ङीष् वाच्यः * ॥ उपाध्यायी । उपाध्याया ॥ आचार्योपसर्जनश्च * ॥ आचार्यस्य स्त्री आचार्यानी । पुंयोग इत्येव । आचार्या स्वयं व्याख्यायी ॥ आर्षक्षत्रियाभ्यां वा स्वार्थे * ॥ अर्याणी । अर्या । स्वामिनी वैश्या वैश्वर्यः । क्षत्रियाणी । क्षत्रिया । पुंयोगे तु । अर्यी । क्षत्रियी । कथं ब्रह्माणीति । ब्रह्माणमानयति जीवयतीति कर्मण्यण् ॥

505. The augment आनुक् is added to the Proper Nouns इन्द्र, वरुण, भव, शर्व, रुद्र, and मृड, and to the words हिम 'snow,' अरण्य 'a forest,' यव 'barley,' यवन 'a Yavana,' मातुल 'a maternal uncle,' and आचार्य 'a preceptor,' before the feminine affix ङीष्॥

The present sûtra teaches two things, the addition of the augment आनुक् (आन्) and secondly the feminine affix ङीष॥ Out of the above words, in the case of those about which matrimonial relation is desired to be expressed, *i. e.* the Proper Nouns upto रुद्र, the present sûtra teaches only the addition of the augment आनुक्, for in their case, the affix ङीष् would follow by force of the preceding Sûtra. In the case of the remaining words, it teaches both these things.

Thus इन्द्राणी the wife of Indra.'

Vârt:—Of the words हिम and अरण्य, there is the augment आनुक् in the sense of greatness. Thus हिमानी 'a glacier, much snow,' अरण्यानी 'a great forest.' Otherwise these words are always Neuter and never take feminine.

Vârt:—After the word यव 'barley' the feminine affix and the augment are added in the sense of fault. The fault consists in its imitating barley while not being a barley. In fact, the word denotes a new and inferior sort of grain. Thus यवानी "a kind of grain, oat."

Vârt:—After the word यवन, the affix and the augment are added in the sense of handwriting. Thus यवनानी 'the written character of the Yavanas.'

Vârt:—Of the words मातुल 'a maternal uncle,' and उपाध्याय 'a preceptor,' when the feminine affix comes to express the wife there of, the augment आनुक् is optional. Thus मातुलानी or मातुली 'the wife of a maternal uncle' उपाध्यायानी or उपाध्यायी 'the wife of a preceptor.'

Digitized by Google

Vârtika:—But when the female herself is a teacher (not necessarily the wife of a teacher) then the addition of ङीष् is optional. Thus उपाध्यायी or उपाध्याया.

Vârt:—And there is not the change to the lingual ण् of the dental न् of the augment आनुक् (VIII. 4. 2 S. 197), after the word आचार्य। Thus आचार्यानी or आचार्या 'the wife of a preceptor.'

Vârt:—After the words अर्य and क्षत्रिय this rule applies optionally: when the matrimonial relation is not intended, but the word retains its own sense. Thus अर्याणी or अर्या 'the female of the Arya or Vaishya class,' क्षत्रियाणी or क्षत्रिया 'a female of the Kshatriya class.' When matrimonial relation is to be expressed, then only ङीष् is added. As अर्या 'the wife of a Vaishya,' क्षत्रिया 'the wife of a Kshatriya.'

How do you explain the form ब्रह्माणी? It is derived from the derivative word ब्रह्मान by adding ङीष्. The word ब्रह्मान is formed by adding the affix मन to the root मन् "to breathe" in the sense of object by III. 2. 1. S. 2913, ब्रह्म + मन् + मन् = ब्रह्मान : f ब्रह्माणी.

५०६। क्रीतात्करणपूर्वात्।४।१।५०॥

क्रीतान्तादवन्तात्करणादेः स्त्रियां ङीष् स्यात्। वस्त्रक्रीती। क्वाचित्। धनक्रीता॥

506. The affix ङीष is employed in the feminine after a compound word ending in क्रीत, the first member of the compound being the name of the means where with the thing is bought.

The word करणपूर्वम् means that compound in which the करण of 'means' is the first member. Thus वस्त्रक्रीती 'a female bought in exchange for cloth.' The word धनक्रीता is an exception, founded on the diversity allowed by कर्तृकरणे कृता बहुलम् (II. 1. 32).

५०७। क्वादल्पाख्यायाम्।४।१।५१॥

करणादेः क्वान्तात् स्त्रियां ङीष् स्यादल्पत्वे गोत्वे। अभ्रलिह्नी द्यौः॥ अल्पाख्यायाम् किम् चन्दनलिप्ताङ्गना॥

507. The affix ङीष् is employed after a compound Nominal-stem in which a name denoting "the means where with," is the first member, and the second member is a word formed by the Participle क्त, when the sense is that of 'a small quantity'

Thus अभ्रविलिप्ती द्यौः 'a sky covered slightly with clouds,

Why do we say when the sense is that of 'little'? Observe चन्दनलिप्ताङ्गना "a lady covered with sandal essence?"

Digitized by Google

Note:—The word करण पूर्वात् 'preceded by a noun denoting 'the means where with', of the last Sûtra governs this also. The participle in क्त must be preceded by a noun in the instrumental case, and the sense conveyed by क्त to the action should give the sense of 'little', in connection there with. The अल्पाख्यायाम् of the sûtra qualifies the whole word.

५०८। बहुव्रीहेरूधत्रियामूङ्दवतात्। ४। १। ५२॥

बहुव्रीहेः क्तान्तादन्तोदात्तादवतात् स्त्रियां ङीष् स्यात्॥ * जातिपूर्वादिति वक्तव्यम् *॥ तेन बहुनम्सुकालसुखादिपूर्वान्न। ऊरुभिन्नी। नेह। बहुकृता॥ * जातान्तान्न * ॥ दन्तजाता। * पाणिगृहीती भार्यायाम् * ॥ पाणिगृहीतान्या॥

508. The affix ङीष् is employed in the feminine after that Bahuvrîhi compound, which ending with a word formed by the affix क्त, has an acute accent on the last syllable.

Note:—The word क्तात् of the last aphorism governs this also. This sûtra applies to those Bahuvrîhi compounds in which the first member is a *svânga* word. But if the antecedent member is not a *svânga* word, then the application of the rule is optional.

Vârt:—It should be stated that the rule applies to those compounds only which have a word denoting jâti (class-name) as first member. As ऊरुभिन्नी 'having a rent on the thigh' but not in 'बहुकृता' on account of the following *Vârtika*:—

Vârt:—Exception must be stated in the case of compounds, the antecedent member of which is any one of the following words:—बहु, नञ्, सु, words denoting time, सुख &c. Thus बहुकृता, &c,

Vârt:—Prohibition must be stated in the case of the participle जात 'born,' which is also acutely accented on the final. Thus दन्तजाता 'a female who has cut her teeth'.

Vârt—In the case of words पाणिगृहीती &c, the affix is employed in certain senses only. Thus पाणिगृहीती 'a wife'; (अग्निसाक्षिकं वरेण पाणिर्गृह्यते); but पाणिगृहीता 'a woman whose hands have been taken, but not before the sacred fire, a concubine &c.'

Note:—Bahuvrîhi compounds get acute accent on the final syllable when they fall under the rules VI. 2. 170 and the following.

५०९। अस्वाङ्गपूर्वपदाद्वा। ४। १। ५४॥

पूर्वेण नित्ये प्राप्ते विकल्पोऽयम्। सुरापीती। सुरापीता। अन्तोदात्तात्किम्। वस्त्रच्छन्ना। अस्वाङ्गादनादित्युदात्तनिषेधः। अत एव पूर्वेणापि न ङीष्॥

509. The affix ङीष् is optionally employed in the

Digitized by Google

feminine after a Bahuvrîhi compound ending in क, having acute accent on the final, the antecedent word not being a word denoting a part of the body.

The words अन्तोदात्तात् and कान्तात् govern this sûtra. This aphorism lays down an option, where by the last aphorism, it would have been compulsory. Thus सुरापीती or सुरापीता ॥

Note:—Why do we say 'when the first member of the compound is not a *svânga* word'? Observe संज्ञाभिन्नी, रूपभिन्नी which admit of only one form.

Why do we say when the final is acutely accented? Observe वस्त्रच्छन्ना which is not acutely accented on the final (see VI. 2. 170), because the first member is a word denoting dress or आच्छादन, which is especially excepted from the scope of rule VI. 2. 170, and therefore it will not take ङीष् even by the preceding sûtra.

५१० । स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् । ४ । १ । ५४ ॥

असंयोगोपधमुपसर्जनं यत्स्वाङ्गं तदन्तात्प्रातिपदिकाद्वा ङीष् । केशानतिक्रान्ता अतिकेशी । अतिकेशा । चन्द्रमुखी । चन्द्रमुखा । संयोगोपधात्तु सुगुल्फा । उपसर्जनात्किम् । शिखा । स्वाङ्गं किम् ।

अङ्गं मूर्तिमत्स्वाङ्गं प्राणिस्थमविकारजम् * ॥

सुस्वेशा ह्रस्वात् । सुज्ञाना अमूर्तत्वात् । सुमुखा शाला अप्राणिस्थत्वात् । सुशोफा विकारजत्वात् ॥

अतत्स्थं तच्च दृष्टं च * ॥

सुकेशी सुकेशा वा रज्वा । अप्राणिस्थस्यापि प्राणिनि दृष्टत्वात् ॥

तेन चेत्तत्तथा युतम् * ॥

सुस्तनी सुस्तना वा प्रतिमा प्राणिवत्प्राणिसदृशे स्थितत्वात् ॥

510. And the feminine affix ङीष् comes optionally after what ends with the name of a part of the body, when the word is a subordinate member in a compound, and has not a conjunct for its penultimate letter (*i. e.* the final अ is not preceded by a double consonant.)

Thus अतिकेशी or अतिकेशा; चन्द्रमुखी or चन्द्रमुखा ॥ The word अतिकेशा is a Tatpurusha compound meaning अतिक्रान्ता केशान्. and केश is upasarjana by I. 2. 44.

Note:—The *anuvritti* of the words बहुव्रीहेः, कान्तादन्तोदात्तात् does not extend to this aphorism. But the anuvritti of the word वा 'optionally' does extend to this Sutra.

Why do we say "subordinate in a compound"? Witness अशिखा "without crest" (where the शिखा is not subordinate or epithetical). Why

Digitized by Google

do we say "not having a conjunct for its penultimate letter"? Witness सुतुल्का, सुपादर्वा) ॥

The स्वाङ्ग which is of three sorts, has a technical meaning, as given in the following verse :—

अद्रव्यं मूर्तिमत्स्वाङ्गं प्राणिस्थमविकारजम् ।
अतत्स्थं तत्तदृष्टं च तेन चेत् तत्तथायुतम् ॥

A word denoting a thing which (1) not-being-a-fluid (अद्रव्यं) is capable of being perceived by the senses, because of its having-a-form (मूर्तिमत्) is svâṅga; it must exist-in-a-living-being, (प्राणिस्थ), but not produced by a change from the natural state (अविकारज) (2) Or though found elsewhere actually (अततस्थ lit. not actually there in the body) had previously been known as existing in only a living being (तत्तदृष्ट lit. was seen in the body); (3) Or is found to have actually the same relation to the being it is in, as a similar thing has to a living being तेन चेत् तत् तथा युतम् ॥

Thus of the first kind of Svâṅga, the counter-examples are सुस्वेदा "she who has good sweat:" here "sweat" is "*liquid*" and so it is not a svâṅga; सुज्ञाना "who has good knowledge"; here "knowledge" has no *form*, and so it is not a svâṅga, सुमुखा शाला "a hall having a good front," here मुख though lit. "face," is applied to an inanimate object, and so is not svâṅga; so that the following is wrong फलमुखी कारणमुखी चानवस्था; similarly सुशोफा "she who has a good deal of swelling or tumours." Here "swelling" or "tumours" are not natural members of body but excrecences: and hence it is not a svâṅga.

Of the second kind of svâṅga words, the example is सुकेशी सुकेशा वा रथा "A chariot well-cushioned with hair." Though chariot is a non-living being yet hair is always found in a living being.

Of the third kind of svâṅga, we have सुस्तनी or सुस्तना वा प्रतिमा "a statue having good breasts." Here the breasts have the same relation to the statue as they have in an animate being.

५११ । नासिकोदरौष्ठजङ्घादन्तकर्णश्रृङ्गाच्च । ४ । १ । ५५ ॥

एभ्यो वा ङीष् स्यात् । "आजयार्थैकलक्षणो निषेधो बाध्यते । पुरस्तादपवादन्यायात् । ओडादीनां पञ्चानां तु असंयोगोपधादिति पर्युदासे प्राप्त वचनम् । मैध्येऽपवादन्यायात् । सहनञ्लक्षणस्तु प्रतिषेधः परत्वादस्य बाधकः । तुङ्गनासिका । तुङ्गनासिका इत्यादि । नेह । सहनासिका । अनासिका । अत्र वृत्तिः ॥ अङ्गगात्रकण्ठेभ्यो वक्तव्यम् * ॥ स्वङ्गी स्वङ्गत्यादि । एतच्चानुक्तसमुच्चयार्थेन चकारेण संगृह्यमिति केचित् ॥ भाष्यान्यनुक्तत्वात्प्रमाणमिति प्रामाणिकाः । अत्र वार्तिकानि ॥ पुच्छाच्च * ॥ सुपुच्छी । सुपुच्छा ॥ कबरमणिविषशरेभ्यो नित्यम् * ॥ कबर चित्र पुच्छं यस्याः सा कबरपुच्छी मयूरी इत्यादि ॥ उपमानात्पक्षा पुच्छाच्च * ॥ नित्यमित्येव । उलूकपक्षी शाला । उलूकपुच्छी सेना ॥

511. And the feminine ङीष् comes optionally after

Digitized by Google

compounds ending with नासिका 'a nose,' उदर 'belly,' ओष्ठ 'lip,' जङ्घा 'leg,' दन्त 'a tooth,' कर्ण 'ear,' and शृङ्ग 'horn'

The first two words नासिका and उदर are words of more than two syllables, and so would have been governed by the following sûtra. This sûtra debars the application of IV. 1. 56, which follows it on the maxim पुरस्तात् "Apavâdas that precede the rules which teach operations that have to be superseded by the Apavâda operations, supersede only those rules that stand nearest to them, not the subsequent rules."

While the five words ओष्ठ &c., were excluded from the operation of the preceding sûtra by the incidental negation (paryudâsa) of असंयोगोपधात् ॥ This present sûtra makes an exception to that exception with regard to these five words. This is on the maxim: मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् "Apavâdas that are surrounded by the rules which teach operations that have to be superseded by the apavâda operations, supersede only those rules that PRECEDE, not those that follow them." Therefore though the sûtras IV. 1. 54 and 56, are superseded by the present sûtra, not so the sûtra IV. 1. 57, which supersedes this because of its being *subsequent* but one.

Thus तुङ्गनासिकी or तुङ्गनासिका; &c; but we have only one form as सुनासिका, अनासिका by the operation of IV. 1. 57 S. 513.

In the opinion of Kâtyâyana, the affix ङीष् optionally comes after अङ्ग, गात्र कण्ड &c. Thus स्वङ्गी or स्वङ्गा &c.

According to others, all this as well as that which is not mentioned here may be taken as read into the sûtra by the force of the connecting particle च ॥ While on the other hand those who are very particular about authority, say that we cannot do so, because these are not mentioned in the *Bhâsya*. Hence the following *Vartikas*:—

Vârt:—So also after the word पुच्छ 'tail.' As सुपुच्छा or सुपुच्छी ॥

Vârt:—The affix *îsh* comes necessarily and not optionally after compounds of पुच्छ with कबर meaning variegated, picturesque मणि, विष and शर ॥ As, कबरपुच्छी 'a peahen' मणिपुच्छी, विषपुच्छी, 'a scorpion' and शरपुच्छी ॥

Vârt:—So also the feminine affix *îsh* is necessarily employed after the words पक्ष and पुच्छ when used as a simile or as objects of comparison. As उलूकपक्षी सेना, उलूकपुच्छी शाला ।

५१२ । न क्रोडादिबहुचः । ४ । १ । ५५ ॥

क्रोडादेर्बहुचश्च स्वाङ्गात् ङीष् । कल्याणक्रोडा । अभ्यासाद्यूः क्रोडा । आकृतिगणोऽयम् । सुजघना ॥

512. The feminine affix ङीष् does not come after

Digitized by Google

a Nominal-stem which denoting a part of the body, belongs to the class क्रोडा nor when the word is a stem of more than two syllables.

क्रोडा means 'the breast of a horse.' The krodâdi class is âkritigana. So is also सुजघना which is a word of more than two syllables.

Note:—According to Ganaratnamahodadhi the word क्रोड without any gender is read in the Ganapâtha: implying that examples can be given with all the three genders. Mâdhava derives it from krud with घञ्; krodâ meaning the breast of a horse and according to him क्रोडा is read in Ganapâtha: and it forms Bahuvrîhi when it has the sense above given. Otherwise as a general svânga word we have ङीष् as कल्याणक्रोडी नदी॥

Note:—The class क्रोड &c. is akriti-gana, that is a class of words constitn ted by usage. The following are some of the examples:—As कल्याणक्रोणा, कल्याणखुरा, कल्याणोखा, कल्याण वाला, कल्याण घफा, कल्याण घाणा॥ So also सुभगा, सुशला, &c. Of the case where the word is polysyllabic, the examples are सुजघना, पद्मजघना, महा-ललाटा॥ The word क्रोडा is feminine itself, and in the Bahuvrihi the feminine sign of the first member is elided by pungvad-bhâva, and क्रोडा is shortened to क्रोड because it is an upasarjana (I. 2. 48).

५१३। सहनञ् विद्यमानपूर्वाच्च। ४। १। ५७॥

सहेत्यादिविधिकपूर्वान्न ङीष्। सकेशा। अकेशा। विद्यमाननासिका॥

513. The affix ङीष् does not come in the feminine after a Nominal-stem denoting a part of the body, when the word is subordinate jn a compound, preceded by the word सह 'with', नञ् 'not', or विद्यमान 'having'

Thus सकेशा, अकेशा, विद्यमाननासिका॥

Note:—The last example shows, that the present rule governs also IV. 1. 55 *ante*: as well as IV. 1. 54.

५१४। नख मुखात्संज्ञायाम्। ४। १। ५८॥

ङीष् न स्यात्। शूर्पणखा। गौरमुखा। संज्ञायां किम्। ताम्रमुखी कन्या॥

514. The feminine affix ङीष् is not employed after नख, and मुख, when (the word at the end of which thev stand) is a Name.

Thus शूर्प + नखा = शूर्पणखा, 'Sûrpaṇakhâ the sister of Râvaṇa'. The न् is changed to ण् by VIII. 4. 3 S. 857 (पूर्वपदात् संज्ञायामगः)॥ So also गौरमुखा, Why do we say 'when denoting a Name'? Witness ताम्रमुखी कन्या 'a copper-faced damsel'.

Digitized by Google

५१५ । दिक् पूर्वपदात् ङीप् । ४ । १ । ६० ॥

दिक्पूर्वपदात्स्वाङ्गान्तान्नातिप्रातिपदिकात्परस्य ङीषो ङीबादेशः स्यात् । प्राङ्मुखी । आयुधान्तं पदम् ॥

515. The feminine affix ङिप् replaces ङीष् after a Nominal stem denoting a part of the body which is preceded by a word signifying direction.

Thus प्राङ्मुखी ॥ The accent here falls on the first syllable.

Note :—This aphorism over-rules all the rules and prohibitions contained in sûtras 510 to 514. Whereeven by those rules there would have been ङीष्, the present enjoins ङीप् instead. Though the form will be the same, the difference will be in the accent ; the affix ङीप् being anudâtta (III.1. 4. S. 3709). Thus प्राङ्मुखी ॥

५१६ । वाहः । ४ । १ । ६१ ॥

वाहन्तात्प्रातिपदिकात् ङीप् स्यात् । ङीषेवानुवर्तते न ङीष् ॥ दित्यवाट् च मे दित्यौही च मे ॥

516. The feminine affix ङीष् comes after a Nominal-stem ending with the word वाह् ॥

The anuvṛitti of ङीष् is to be taken in this aphorism and not that of ङीप, though the latter was nearer. Thus दित्यवाट् च मे दित्यौही च मे ॥

Note :—The word वह is formed from the root वह with the affix क्विप् (III. 2, 64). The word वाह् is never found alone, but as ends of compounds, hence we apply the rule of *tadanta*, and have translated it by saying a " word ending in vâh." Thus दित्यौही 'sustaining the demon.' This form is thus evolved :— दित्य + वाह् + ङीष् = दित्य + ऊह् + आह् + ङीष् (VI. 4. 132 वाह ऊठ्, Uth is the samprasârana of vâh, when this is a *bha*) = दित्य + ऊह् + ङीष् (VI. 1. 108) संप्रसारणाच 'after a samprasârana if a vowel follow, the form of the prior is the single substitute '), = दित्यौही (VI. I. 89 S. 73 एत्येधत्यूठ्सु vriddhi is the single substitute when *eti*, *edhati* or ûth follow'). Similarly प्रष्ठौही 'a young heifer training for the plough.'

५१७ । सख्यशिश्वीति भाषायाम् । ४ । १ । ६२ ॥

इतिशब्दः प्रकारे भाषायामित्यस्यानन्तरं द्रष्टव्यः । छन्दस्यपि क्वचित् । सखी । अशिश्वी । आधेनवो धुनवन्तोऽशिश्वीः ॥

517. The form सखी 'a female companion" and अशिश्वी " a childless woman," are irregular forms ending in ङीष् found in secular (or vernacular as opposed to Vaidic) Sanskrit.

The word इति in the sûtra has the force of प्रकार " thus " its syntacti-

Digitized by Google

cal position is after भाषावाम् ॥ Therefore we find sometime such use in the vaidic literature also.

Note :—Thus सखीयं मे ब्राह्मणी, and मास्वाः शिशुरस्तीति = अशिश्वी ॥ Why do we say in vernacular Sanskrit? Observe सखासप्तपदी भव and अशिशुमेव मामकं शिशुरभिमन्यते ॥

Sometimes we find these forms in the Vedas also, though rarely, as आपेनवो धुनयन्तामशिश्वी ॥ सखी सप्तपदी भव ॥

५१८ । जातेरस्त्रीविषयादयोपधात् । ४ । १ । ६३ ॥

जातिवाचि यन्न च स्त्रियां नियतमयोपधं ततः स्त्रियां ङीष् स्यात् ।

आकृतिग्रहणा जातिः * ॥

अनुगतसंस्थानव्यङ्ग्येत्यर्थः । तटी ॥

लिङ्गानां च न सर्वभाक् ॥

सकृदाख्यातनिर्ग्राह्या * ॥

असर्वलिङ्गत्वे सत्येकत्वं व्यक्तौ कथनाद्व्यक्तयन्तरे कथनं विनापि सुग्रहा जातिरिति लक्षणान्तरम् । वृषली । सत्यन्तं किम् । शुक्ला । सकृदित्यादि किम् । देवदत्ता ॥

गोत्रं च चरणैः सह * ॥

अपत्यप्रत्ययान्तः शाखाध्येतृवाची च शब्दो जातिकार्यं लभत इत्यर्थः । औपगवी । कठी । बह्वृची । ब्राह्मणीत्यत्र तु शार्ङ्गरवादिपाठात् ङीनी ङीष बाध्यते । जातेः किम् । शुण्डा । अस्त्रीविषयादिति किम् । बलाका । अयोपधादिति किम् । क्षत्रिया ॥ योपधप्रतिषेधे हयगवयमनुष्यमत्स्यानामप्रतिषेधः * ॥ हयी । गवयी । मनुषी । हलन्तलक्षितस्येति बलोपः । मानुषी । मत्स्यस्य रूपाम् ० ॥ मत्स्यी ।

518. The feminine affix ङीष् comes after a word denoting a jâti or species, when it does not express in its original meaning a feminine, and which moreover has not the letter य् for its penultimate.

The word जाति is thus defined :—

आकृति ग्रहणा जातिर्लिङ्गानां च न सर्वभाक् ।
सकृदाख्यात निर्ग्राह्या गोत्रं च चरणैः सह ॥

(This verse is split up into three parts by Bhattoji and thus explained): आकृतिग्रहणाजातिः whatever is distinguishable from another (*species*) on account of its possessing certain form or figure (common to individuals of that class) is a jâti. Or a jâti noun is that which expresses a distinguishing feature. Thus तटी 'a bank, a place near the river.' But :—(2) लिङ्गानां च न सर्वभाक् "Provided that it is not a word used in all genders" (for then it will be a genus and not *species*), सकृदाख्यात निर्ग्राह्या, but though not used in all genders, yet while employed to denote a single individual and therefore in singular number, it will apply to other individuals of the class without their being

Digitized by Google

specially mentioned. Such a word would also be jâti. Thus वृषली "a low caste woman," which implies her sons, brothers &c. Why do we say not having all genders? Observe शुक्ल ॥ Why do we say "singly used implying others"? Observe देवदत्ता (3) गोत्रं च चरणैः सह "A word denoting Gotra descendant denoted by a grammatical affix and charan (or school) is also a jâti word." That is to say, a word formed with a Patronymic affix, and expressive of a person belonging to a particular branch of Vedic school, who studies a particular portion of the Vedas. As औपगवी, कठी बह्वृची ॥ In ब्राह्मणी the ङीष is debarred by ङीन् as it is read in sarṅgaravâdi class. (IV. 1. 73)

Why do we say "expressive of jâti"? Observe मुण्डा 'shaven' (where the word expresses not a jâti but a quality.) Why do we say "not invariably feminine"? Witness बलाका 'a mistress, a beloved woman.' Why do we say "not having the letter ङ् for its penultimate?" Witness क्षत्रिया 'a female of the Kshatriya class.'

Vârt:—In excluding words that have the letter ङ् as penultimate, there is not involved the exclusion of the following words (which have a penultimate ङ्) *viz.*, गवय 'the Bos Gaveans,' हय 'horse,' सृकय 'a sort of animal' मत्स्य 'a fish,' and मनुष्य 'a man.' Thus गवयी, हयी, मनुषी, (VI. 4. 150 S. 472 इलस्तद्धितस्य 'there is elision of the इ of a taddhita affix coming after a consonant when long ई follows') मत्सी ॥ The ङ् of *Matsya* is elided by the vârtika 'मत्स्यस्य ह्यप्राम्' ॥ See also VI. 4. 149. S. 499 All these words are also included in the class गौरादि (IV. 1. 41 S. 498) and would have taken ङीष् independently of this vârtika.

Note:—The Loukika Gotra should not be confounded with the Grammatical Gotra. Charana is one who studies a particular shâkhâ of a Veda. Some explain however, that the word Gotra here means the Laukika Gotra of Clans. The above examples of कठी meaning "a woman who reads the Veda as belonging to the Katha Shakhâ" and बह्वृची "a woman who must read Rik verses," show that women were not debarred from the study of *Vedas* even in Pâṇini's time. The present day prohibition is of recent origin, not more than a thousand years or so. For we read:—

पुरा कल्पेषु नारीणां मौञ्जीबन्धनमिष्यते ।
अध्यापनं च वेदानां सावित्रीवचनं तथा ॥

"In ancient times women were invested with the sacred thread and girdle of a Brahmacharin and they were taught the Vedas and the Gayatri."

५१९ । पाककर्णपर्णपुष्पफलमूलबालोत्तरपदाच्च । ४ । १ । ६४ ॥

पाकाद्युत्तरपदाज्जातिवाचिनः स्त्रीविषयादपि ङीष् स्यात् । ओदनपाकी । दृढ़कर्णी ॥ शालपर्णी । जलपुष्पी । दासीफला । दर्भमुली । गोबाली । ओषधिविशेषे रूढा एते ॥

Digitized by Google

519. And the feminine affix ङीष् comes after the Nominal-stem expressive of jâti, followed by the following पाक 'cooked,' कर्ण 'ear,' पर्ण 'leaf,' पुष्प 'flower,' फल 'fruit,' मूल 'root,' and बाल 'youth.'

Here the affix applies to words which in their original sense denoted females, and, therefore, were not provided by the last sûtra. Thus ओदनपाकी शंकुकर्णी, शालपर्णी, शंखपुष्पी, वासफली, दर्भमूली, and गोबाली all these are rûdhi words expressing medicinal herbs.

When, however, the affix ङीष् is not intended to be applied to compounds ending with फल, पुष्प, and मूल, then those compounds will fall under Ajâdi class (IV. 1. 4 S. 454; such as सुफला, मक्षफला, सत्पुष्पा, अमूला &c.

५२० । इतो मनुष्यजातेः । ४ । १ । ६५ ।

ङीष् स्यात् । दाक्षी । बोपधादपि । उदमेवस्यापत्यं स्त्री औदमेवी । मनुष्येति किम् । तित्तिरिः ॥

520. The feminine affix ङीष् comes after a Nominal-stem ending in short इ denoting classes or races of men.

Thus अवन्ती 'women of Avanti,' कुन्ती 'women of Kunti,' दाक्षी 'Dâkshi.' Thus अवन्ति + ञ्यङ् (IV. 1. 171 S. 1189) 'आवन्त्यः men of Avanti.' In the feminine this affix by IV. 1. 176 S. 1195 is elided. दाक्षी "the female descendant of Daksha." Why do we say "ending in short इ"? Witness विट् 'Vaishya,' दरत् 'Darat.' Why do we say "of men"? Witness तित्तिरिः 'partridge.'

Though the anuvritti of the word जाति could have been read into this aphorism from IV. 1. 63, S. 518 its repetition here indicates that ङीष् is to be applied even when the penultimate letter is इ. Thus औदमेवी ॥

Vârt:—This rule applies to words ending in the taddhita affix इञ् (IV. 2. 80 S. 1292) though they do not denote a *jati*. Thus सौतंगमी, सौमत्थिली ॥ The affix इञ् here referred to is the quadruply significant affix taught in IV. 2. 80 S. 1292 and ordained to come after सुतंगम &c., and does not denote a jâti.

५२१ । ऊङुतः । ४ । १ । ६६ ॥

ऊकारान्तादबोपधान्मनुष्यजातिवाचिनः स्त्रियामूङ् स्यात् । कुरूः ॥ कुरुनादिभ्यो ण्यः ॥ तस्य स्त्रियामवन्तीत्यादिना लुक् । अबोपधात्किम् । अध्वर्युः ॥ अप्राणिजातेरवयवादीनामुपसंख्यानम् ॥ रज्ज्वादिपर्युदासादुवर्णान्तेभ्य एव । अलाब्वा । कर्कन्ध्वा । अनबोर्ईर्यान्तत्वेऽपि नोङ्धात्वोरिति विभक्तयुदाहरणप्रतिषेध ऊङः फलम् ॥ प्राणिजातेस्तु कुकवाकुः । रज्ज्वोस्तु रज्जुः । हनुः ॥

521. After a nominal-stem ending in short उ not having the letter य as its penultimate letter, and being expressive of races of men, the affix in the feminine is ऊङ्.

Digitized by Google

The anuvritti of the words मनुष्यजाति and अवोपधात् should be read into the sûtra to complete it. Thus कुरु : 'a female of the country of the Kurus,' ब्रह्मबन्धू : "a Brahmani of the class of the fallen Brahmans so called," जीवबन्धू : "a woman of the Jîvabandhu class."

Thus कुरु+ण्व=कौरव्यः IV. 1. 172, S. 1190 and this affix is elided by IV. 1. 176 S. 1195 in the feminine.

Note :—The long ऊ is taught to debar the affix ऊङ्, for a short उ would have also given the form ङीष् (कुरु+उ=कुरु) ॥ The long ऊ therefore, indicates that the affix ऊङ्, enjoined by V. 4. 154, S. 891 in Bahuvrîhis, will not apply in the feminine forms ब्रह्मबंधूः and the like, by the rule of vipratishedha.

The indicatory letter ङ् in ऊङ् is to distinguish this affix in Sûtras like नोङ् धात्वोः (VI. 1. 175 S. 3721), for had the affix been enunciated merely as ऊ, then the Sûtra VI. 1. 175 S. 3721 would have run as नो धात्वोः and the sense would have been ambignous, for we could not have known what affix was partcularly meant there. Thus in ब्रह्मबन्ध्वां we could not have known the accent.

Why do we say "not having the letter ङ् as its penultimate"? Witness अध्वर्युब्राह्मणी 'a woman versed in the Yajur Veda'.

Vârt :—The affix ऊङ् comes under similar conditions afterwords denoting non-animate jâti, except the words रज्जु &c. Thus अलाबू : 'the bottlegourd'; कर्कन्धूः 'the jujube tree.' Though these two words have ऊ in the masculine also, yet the addition of another long ऊ in the feminine indicates the difference of *accent*, though not of form, as अलाब्वा and कर्कन्ध्वा are svarita accented on the final by VI. 1. 175 S. 3721 Why do we say "non-animate"? Witness कृकवाकुः 'a kind of lizard.' Why do we say "except the word rajju &c" Witness रज्जुः 'rope'; हनुः 'cheek' &c. The example अलाब्वा is Instrumental singular, and it is here that the rule of accent can be illustrated, and not in the Nominative or Accusative

५२२ । बाह्वन्तात्संज्ञायाम् । ४ । १ । ९७ ॥

स्त्रियामूङ् स्यात् । भद्रबाहूः । संज्ञायां किम् । वृत्तबाहुः ॥

522. The feminine affix ऊङ् comes in denoting a Name after a Nominal-stem ending with the word बाहु ॥

Thus भद्रबाहूः 'Bhâdrabâhû'. Why do we say in "expressing a Name"? Observe वृत्तबाहुः 'a woman having rounded arms,' which is an attributive word. In other words, when the compound is a name, बाहु takes long ऊ in the feminine.

Digitized by Google

५२३ । पङ्गोश्च । ४ । १ । ६८ ॥

पङ्गूः । श्वशुरस्योकाराकारलोपश्च * ॥ चादूङ् । पुंयोगलक्षणस्य ङीषोऽपवादः । लिङ्गविशिष्ट-परिभाषया स्त्रीत्वम् । श्वश्रूः ।

523. The feminine affix ऊङ् comes after the word पंगु 'lame'.

As पङ्गूः 'a female lame'.

Vârt :—The feminine affix ऊङ् is added to श्वशुर, and thereby there is elision of the letter उ and of the letter अ of the word. As श्वश्रूः 'mother-in law'. This debars the puṅyoga ङीष् of IV. 1. 48. S. 504 The case affixes are added to the base श्वश्रू on the maxim प्रातिपदिक ॥ &c. see IV. 1. 1. S. 182.

५२४ । ऊरूत्तरपदादौपम्ये । ४ । १ । ६६ ॥

उपमानवाचिपूर्वपदमूरूत्तरपदं यत्प्रातिपदिकं तस्मादूङ् स्यात् । । करभोरूः ॥

524. The feminine affix ऊङ् comes after a stem ending in ऊरु when comparison with something (expressed by the first term) is meant.

Thus करभोरूः 'a female with thighs like the ulnar or tapering fleshy side of the hand'.

Why do we say "when expressing an object of comparison"? Witness वृत्तोरूः स्त्री "a woman with round thighs'. The word करेणुकरोरु "thigh like the proboscis (कर) of an elephant (करेणु)" is a poetic irregularity in the following विन्धकरे च करेणुकरोरुभिः ॥

५२५ । संहितशफलक्षणवामादेश्च । ४ । १ । ७० ॥

अनौपम्यार्थं सूत्रम् । संहितोरूः । सैव शफोरूः । शफौ खुरौ तावेव संश्लिष्टत्वादुपचारात् । लक्षणशब्दादर्शआद्यच् । लक्षणोरूः । वामोरू ॥ सहितसहाभ्यां चेति वक्तव्यम् * ॥ हितेन सह सहितौ ऊरू यस्याः सा सहितोरूः । सहेते इति सहौ ऊरू यस्याः सा सहोरूः । यद्वा । विद्यमानवचनस्यैव सहस्य ऊर्वतिशयप्रतिपादनाय प्रयोगः ॥

525. The feminine affix ऊङ् comes in the Vedas after the word ऊरु when the words संहित 'accompanied or joined', शफ 'a hoof', लक्षण 'a mark,' and वाम 'handsome' precede it.

This aphorism applies, when no comparison is intended. As संहितोरूः 'a female whose thighs are joined (e. g. from obesity).' शफोरूः 'whose thighs are put together like the two hoofs on a cows foot". लक्षणोरूः 'whose thighs are marked,' वामोरूः 'with handsome thighs.' The word lakshana here is a Taddhita-formed word meaning "she who has the mark". The affix अच् is added to lakshana by its belonging to अर्शादि class V. 2. 129. S. 1933.

Digitized by Google

Vârt:—So also with the words सहित and सह ॥ As सहितोरूः and सहोरूः ॥ The word सह here has the force of denoting largeness or excessiveness' though it literally means mere existence.

५२६ । संज्ञायाम् । ४ । १ । ७२ ॥

कद्रुकमण्ड्वोः संज्ञायां स्त्रियामूङ् स्यात् । कद्रूः । कमण्डलूः । संज्ञायां किम् । कद्रुः कमण्डलुः । अच्छन्दोर्थं वचनम् ॥

526. The feminine affix ऊङ् comes in denoting a Name, after the word कद्रु and कमण्डलु ॥

This rule applies to other than Vaidic forms. Thus कद्रूः 'a female named Kadrû wife of Kâśyapa,' कमण्डलूः 'Kamaṇḍalû.' Why do we say "in denoting a Name"? Observe कद्रुः 'the tawny color.' कमण्डलुः 'a water-gourd.'

५२७ । शार्ङ्गरवाद्यञो ङीन् । ४ । १ । ७३ ॥

शार्ङ्गरवादेरञो योऽकारस्तदन्ताच्च जातिवाचिनो ङीन् स्यात् । शार्ङ्गरवी । बैदी । जातेरित्यनुवृत्तेः पुंयोगे ङीषेव । नृनरयोर्वृद्धिश्चेति गणसूत्रम् । नारी ॥

527. The feminine affix ङीन् comes after the words शार्ङ्गरव and the rest, and that which ends with the affix अञ् ॥

Thus शार्ङ्गरवी 'a Sârṅgrava woman.' So also after a word formed with the affix अञ् as, बैदी 'a female descendant of Bida.' This sûtra applies to words expressing jâti or kind. In other words, this aphorism debars the affix ङीष् of IV. 1. 63 S. 518. &c., where it came after jâti-vâchaka words; but it does not debar that ङीष् which is employed in describing the relation of wife, such as, the ङीष् of IV. 1. 48. S. 504.

The नृ would have taken ङीष् by IV. 1. 5 S. 306 and नर would have taken ङीष् as it denotes a jâti. These words take vṛiddhi before ङीन्, the form being नारी in both cases. This is by force of the sûtra नृनरयो &c. read in the following list. Such sûtras are called gana-sûtras.

The following is a list of Sârṅgaravâdi class words:—

1 शार्ङ्गरव, 2 कापटव, 3 गौग्गुलव, 4 ब्राह्मण, 5 बैद, 6 गौतम ॥ These words are formed by the affix अण्, the first four being formed by the अण् of (IV. 1. 83 S. 1073) from शृंगरु, कपटु, गुग्गुलु and ब्रह्मन्; the word गौतम is formed from गोतम by the अण् of IV. 1. 114. This word is also included in Gaurâdi class IV. 1. 41. S. 498 7 कामण्डलेय, 8 ब्राह्मणकुलेय, 9 आनिचेय, 10 आनिधेय, 11 आधीकेय ॥ These are formed by ढक् (IV. 1. 123 S. 1126) except kâmaṇḍaleya which is formed by ढञ् (IV. 1. 135 S. 1141.) 12 वात्स्यायन, 13 मैत्रायण ॥ These are formed by फक् of IV. 1. 101 S. 1103. and IV. 1. 99

Digitized by Google

S. 1101. and denote castes or Gotra. 14 कैकसेव is also formed by ढक् (IV. 1. 123 S. 1126.) 15 काप्य, 16 शैव्य are formed by ष्यङ (IV. 1. 171 S. 1189.) 17 एहि, 18 पर्येहि are formed by इञ् added to आ+इङ् 'to try', and परि+आ+इङ् (Un IV. 117 सर्वधातुभ्य इञ्) 19 आस्तरथ is formed by थक् (IV. 1. 105 S. 1107). ० औदपान is formed by अण् (IV. 3. 76 S. 1455). 21 अराल, 22 चण्डाल, 23 वसण्डः are jâti words. 24 भोगवत्, 25 गौरिमत् ॥ These take ङीष् when denoting a Name. These words are formed by the affix मतुप्, and are consequently ङिति, and should have taken ङीप् (IV. 1. 6 S. 455). This ordains ङीष् ॥

५२८ । यङश्चाप् । ४ । १ । ७४ ॥

यङन्तात् स्त्रियां चाप् स्यात् । यङ इति ष्यङ्ष्यङोः सामान्यग्रहणम् । आम्बष्ठ्या । कारीषगन्ध्या ॥ पाथप्रभाप् पाथ्यः ॥ पौतिमाष्या ॥

528. The feminine affix चाप् comes after a stem which is formed by the affix ष्यङ् or ष्यङ् (with final acute VI. 1. 163.)

The affix यङ् here denotes and includes both the affixes ष्यङ् (as taught in IV. 1. 171 S. 1189 and ष्यञ् (IV. 1. 78 S. 1198) as it is common element of both. Thus आम्बष्ठ्या 'a woman of the race of Ambashṭhya.'

Similarly ष्यङ् formed words, as, कारीषगन्ध्या, &c.

Vârt:—The affix चाप् comes in the feminine after a word ending with the affix यञ् when the letter क् immediately precedes such yañ. As शार्कराक्ष्या 'a female descendant of Śarkarâksha,' पौतिमाष्या 'a female descendant of Pûtimâshya.'

५२९ । आवट्याच्च । ४ । १ । ७५ ॥

अस्माच्चाप् स्यात् । यञ्येति । ङीषोऽपवादः । अवटशब्दो गर्गादिः । आवट्या ॥

529. And the feminine affix चाप् comes after the word अवट्य ॥

The word अवट belongs to Gargâdi class (IV. 1. 105 S. 1107) which after taking यञ्, would have taken ङीप् (IV. 1. 16 S. 471.) Thus आवट्या 'are female descendant of Avaṭa.'

५३० । तद्धिताः । ४ । १ । ७६ ॥

आपञ्चमसमाप्तेरधिकारोऽयम् ॥

530 The Taddhita-affixes are treated of here after.

This is an adhikâra or governing sûtra. Up to the end of the Fifth Book of Pâṇini, all the affixes that will be taught, are to be understood to have the name of Taddhita.

Digitized by Google

Note:—Thus the affix ति taught in the very next sutra. As युवासौ: The word so formed is called Pratipadika. The word तद्धिता: is in the plural number, and not exhibited in the singular, like the word प्रत्ययः (III. 1. 1. S. 180) &c; and it, therefore, indicates that it includes also affixes which are not especially taught in this book. Such as पृथिव्या आग्नेो ॥ अव्ययादाप्सुपः ॥ अव्ययात् परश्चाद् डिमच् ॥ As पार्थिव, अग्निम, आदिम, पश्चिम ॥ See Vart IV. 3. 23. The word Taddhita is used in Sutras like कृत्तद्धितसमासाश्च I. 2. 46.

५३१ । यूनस्तिः । ४ । १ । ७७ ॥

युवन्शब्दात्तिप्रत्ययः स्यात्स च तद्धितः । लिङ्गविशिष्टपरिभाषया स्त्रिये तद्धिताधिकार उत्तरार्थः । युवतिः । अनुपसर्जनादित्येव । बह्वो युवानो यस्यां सा बहुयुवा । युवतीति तु यौतेः शतृन्तात् ङीपि द्रष्टव्यम् ॥

531. The feminine affix ति comes after the Nominal-stem युवन् and this affix gets the name of Taddhita.

As युवतिः 'a young maid.' By IV. 1. 5. S. 306 ङीप् would have been otherwise employed, the present sûtra debars it. The word युवति ending in इ does not take the affix ङीष् of IV. 1. 65, S. 520 for the affix ति its elf is a feminine-making affix though a Taddhita: or the word युवन् may be regarded as a non-jâti word and hence IV. 1. 65 S. 520 would not apply. But when upasarjana we get the form बहुयुवा "a city containing many youths." The form युवती is by ङीप् added to the Present Participle युवत् ॥ and is a different word altogether.

:o:

Digitized by Google

अथ कारकादिविभक्ति प्रकरणम् ॥

CHAPTER XVI.

THE KÂRAKAS.

५३२ । प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा । २ । ३ । ४६ ॥

